# लकारार्थे वैयाकरणमतप्राबल्यम्

**अर्जुनखतिवडाः**
*सहायकप्राध्यापकः, महेशसंस्कृतगुरुकुलविद्यापीठम्*
arjunkhatiwada041@gmail.com

**शोधसारः**

*लकारार्थः शास्त्रेषु विविच्यमानो विषयो वर्तते । मीमांसक-नैयायिकग्रन्थेष्वपि लकारार्थस्य चर्चा विद्यते। वैयाकरणमतेष्वपि महत्त्वपूर्णरूपेणैतस्य विवेचनं दृश्यते। तत्र भाष्यवाक्यपदीयानुरूपं स्वकीयञ्च मतं प्रस्तुत्य वैयाकरणमतेन लकारार्थस्यापि प्रामुख्येन भूषणमञ्जूषादिग्रन्थे विवेचनं कृतमस्तीति विलोक्यते। तत्र नागेशकौण्डभट्टाभ्याञ्च व्याकरणसम्बद्धानेकविषयानां प्रतिपादनं विहितं दृश्यते। लकारार्थविषयकं वैयाकरणमतं महत्त्वपूर्णम्। पूर्वोक्तग्रन्थेषु विभिन्नवादा आपतिताः सन्ति, तेषां प्रतिवादेन निराकरणं कृत्वा वैयाकरणैः स्वकीयमतस्य लघुता उत्कर्षता च दर्शिताऽस्ति। नैयायिकाः लकारस्यैव वाचकत्वं स्वीकृत्य यत्न-संख्या-काला इति त्रीनर्थाँल्लिकारस्य स्वीकुर्वन्ति। मीमांसकाश्च विशेषतो लकारस्य व्यापारार्थत्वं स्वीकृत्य पृथङ्गतं प्रकटयन्ति। नैयायिकवाद आपाततो रमणीयेऽपि नानाविधलक्षणास्वीकारकरणाद्गौरवम्। तथैव पश्य मृगो धावति इत्यत्रैकवाक्यासम्भवात्तन्मतं न स्वीकार्यम्। मीमांसकमते च धात्वर्थव्यापारस्य धातुवाच्यत्वेन तस्य प्रत्ययवाच्यत्वमयुक्तमस्ति। अतो वैयाकरणमते लकारस्य लादेशस्य वोभयेषां वाचकत्वं स्वीकृतम्। संख्या-कारक-कालविशेष-भावाश्चत्वारोऽर्था इति निर्णीतम्। अस्य मतस्यैव लाघवं तथैव सूत्र-वार्तिक-भाष्यकाराविरुद्धसत्त्वादन्यमतेभ्यो वैयाकरणमतस्योत्कर्षता च सिद्ध्यति। अत एवास्मिन्नालेखे लकारार्थविषये वैयाकरणमतं किमर्थमावश्यकम् ? अस्वीकारे का हानिः? नैयायिकमीमांसकवादाश्च के ? कथं तेषां गौरवम् ? कथञ्च वैयाकरणमतस्योत्कर्षता इत्यादिप्रश्नानां समुचितमुत्तरं प्रदत्तमस्ति। तेषां वैयाकरणानां मतानि आधृत्य वैयाकरणीया लाकारार्थी लघुता, उत्कर्षता च वर्णितास्ति। अत्र लकारार्थसम्बन्धे महाभाष्यस्य, वाक्यपदीयग्रन्थस्य साहाय्यं तथान्यग्रन्थस्य साहाय्यं गृहीतं वर्तते ।*

**शब्दबीजानि**

अनद्यतनम्, परोक्षम्, प्रवर्तना, भावना, लकारार्थः ।

**विषयपरिचयः**

वेदस्य मुखरूपाङ्गस्य व्याकरणशास्त्रस्य महत्त्वं लौकिकवैदिकसाहित्येषु समानरूपं विद्यते। वाणीसंस्कार एव व्याकरणशास्त्रस्य न प्रयोजनम्, अपि तु अनेकैः सिद्धान्तैः स्वकीयमतस्थापनपूर्वकं दर्शननामधेयत्वप्रतिपादनमपि प्रयोजनमस्ति। अतः प्रमुखदर्शनेषु व्याकरणदर्शनस्य शब्दब्रह्मवादस्यापि पृथङ्महत्त्वं वरीवर्ति। विशेषतोऽर्थग्रन्थस्य निर्माणेन वैयाकरणसिद्धान्तानां प्रकाशो भूतवानस्तीति निश्चप्रचम्। तेष्वर्थग्रन्थेषु स्फोटवाद-समासशक्तिवादादिनानाविषयाः प्रतिपादिता व्याख्याताश्च सन्ति। तत्र लकारार्थसिद्धान्तोऽपि विशेषेण वर्णितोऽस्ति।अत्र लकारस्य भेदविषये लादेशस्य विषये च चर्चा क्रियते-

**लकारस्य भेदाः**

पाणिनीये व्याकरणे लकारस्य भेदविषये टिल्लकारः, ङिल्लकारः इति उल्लिखितं वर्तते दश लकाराः सन्ति। षड्लकाराः टितश्चत्वारो ङितः (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७०)। लट्, लिट्, लुट्, लृट्, लेट् इति टितः लङ्, लिङ्, लुङ्, लृङ् इति ङितः। अत्र लिङ् इत्यनेन विधिर्लिङ्, आशीर्लिङ् च बुध्यते। दश लकारेषु लेट्लकारस्य प्रयोगः छन्दसि एव क्रियते तत्र छन्दसि इत्यनुवर्तते। अतो लौकिकसाहित्ये तस्य विधानं पाणिनिना न कृतम्। वैदिकसाहित्य एव तस्य विधानं पाणिनिना *लिङर्थे लेट्* (अ. ३/४/७) कृतम्।

**लादेशाः**

*लस्य*(अ.३/४/७७) इति सूत्रं स्थानिनो निर्देशं करोति। लादेशानां नवानां *लः परस्मैपदम्*(अ.१/४/९९) इत्यनेन परस्मैपदसंज्ञा भवति चेत् नवानां *तङानावात्मनेपदम्* (अ.१/४/१००) इत्यनेनात्मनेपदसंज्ञा भवति। तिप्-प्रत्ययादारभ्य महिङ्प्रत्ययपर्यन्ता लादेशाः सन्ति। तत्र अष्टादशप्रत्ययानां क्रमशस्त्रयस्त्रयः प्रत्ययाः प्रथममध्यमोत्तमपुरुषसंज्ञका भवन्तीति पाणिनिसूत्रं *तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः* (अ.१/४/१०१) ज्ञापयति। चेत्तत्रापि त्रिषु मध्ये एकैकस्य क्रमश एकवचनद्विवचनबहुवचनसंज्ञा *तान्येकवचनद्विवचनबहुवचनान्येकशः* ( अ.१/४/१०२) इत्यनेन च भवति। परस्मैपदपक्षे च तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस् इति प्रत्यया भवन्ति। आत्मनेपदपक्षे च त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति प्रत्यया भवन्ति। एतेभ्य अन्ये च लादेशाः शतृशानचौ, क्वसुकानचौ इत्यादयश्च सन्ति। आदेशस्यापि पुनरादेशो भवति, यथा- परस्मैपदस्योत्तमपुरुषस्य लोटो *मेर्निः*(अ.३/४/८९) इत्यनेन मेर्न्यादेशः, आत्मनेपदस्य मध्यमपुरुषस्य लटः *स्थासः से*(अ. ३/४/८०) आदेश इत्यादीन्यन्यान्यप्युदाहरणानि द्रष्टव्यानि।

## शोधसमस्याः

वैयाकरणसिद्धान्तग्रन्थेषु मध्ये लकारार्थविषये वैयाकरणमतस्योकर्षतास्थापनमेव मुख्या समस्या वर्तते। अत एव अनया समस्यया सह सम्बद्धाः समस्याः प्रमुखाः सन्ति-

क) नैयायिकमीमांसकमतस्वीकारे को दोषः?

ख) लकारार्थे वैयाकरणमतस्योत्कर्षता च कथम् ?

## शोधोद्देश्यम्

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति। अस्य शोधकार्यस्य मुख्योद्देश्यानि अधोदर्शितरीत्या विभक्तुं शक्यन्ते-

क) नैयायिकमीमांसकमते दोषप्रदर्शनम्

ख) लकारार्थे वैयाकरणमतस्योत्कर्षतास्थापनम्

## सैद्धान्तिकावधारणा

वैयाकरणशास्त्रे निहितान् सिद्धान्तान् प्रकटयितुं भूषणसारमञ्जूषावाक्यपदीयादिग्रन्था निर्मिता ज्ञायन्ते। अत एव व्याकरणशास्त्रस्य त्रिमुनिसंक्षिप्तगदितसिद्धान्तान् व्यापकीकृत्यार्थग्रन्था विरचिताः। अत्र मञ्जूषाभूषणसारादिग्रन्थे च स्फोटवादः, शक्तिविचारः, निपातार्थविचारः, समासशक्तिविचार इत्यादिवादाश्च सन्ति। एतेषां वादानां प्रादुर्भावश्च

त्रिमुनिगदितसूत्रवृत्तिभाष्यवचनेनैव। यथा पाणिनिना *वर्तमाने लट् (अ. ३/२/१२३)* इति सूत्रकरणेन लड्लकारार्थत्वं वर्तमानत्वम्, उत लड्द्योतकार्थत्वं वर्तमानत्वमिति सिद्धं भवति। इत्थं वादानां जन्म भवति। लकारार्थविषयेऽपि पाणिनेः पूर्वोक्तसूत्रस्य नानाविधव्याख्याकरणेन वर्तमानत्वं लड्लकारार्थत्वमुत लडादेशतिवर्थत्वं वर्तमानत्वमिति पक्षद्वयस्याश्रयेणास्य सैद्धान्तिकावधारणा विकसिता जाता। नागेशस्य कौण्डभट्टस्य च ग्रन्था लकारार्थे विशेषतो वैयाकरणमतस्य सिद्धान्तज्ञान उपयोगिनः सन्ति।

## अध्ययनविधिः

प्रस्तुतं शोधकार्यं मुख्यतो तुलनात्मकविधिना विहितमस्ति। एवञ्च विश्लेषणविधिरपि स्वीकृतो वर्तते।

## सामग्रीसङ्कलनविधिः

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना मञ्जूषाभूषणसारग्रन्थानां प्राथमिकसामग्रीरूपेण तथा मूलग्रन्थटीकादीनां द्वैतीयिकसामग्रीरूपेण सङ्कलनं कृतं विद्यते, तथा च महाभाष्यवाक्यपदीयादिग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते।

## लकारार्थे वैयाकरणमतस्योत्कर्षता

पाणिनीयव्याकरणमेवाधुना साङ्गोपाङ्गेनोपलभ्यते। अतः पाणिनीयव्याकरणस्य व्याख्यातारोऽध्येतारश्च वैयाकरणा बुध्यन्ते। प्रत्येकं लकारस्य शक्तिः कर्तृकर्मसंख्याकालेषु वर्तते। परन्तु विशेषशक्तिस्तु पृथगपि भवितुं शक्नोति। तत्र प्रत्येकं लकारस्य कोऽर्थः ? कथञ्च तस्य प्रयोगे साधुत्वम् ? इति ज्ञानाय पाणिनीयव्याकरणे कृतभूरिपरिश्रमाणां सूत्रकारवृत्तिकारभाष्यकारकैयटभर्तृहरिभट्टोजिदीक्षितकौण्डभट्टनागेशादिविदुषां लकारार्थसम्बन्धे निर्णीतानां मतानामध्ययनेन विस्तरशो वैयाकरणमतस्योत्कर्षता साध्यते। पूर्वं लकारार्था विविच्यन्ते-

### लकारार्थाः/लादेशार्थाः

लकारार्थसम्बन्धे लादेशानां तिबादीनामर्थो वा लकाराणामर्थ इत्यत्र कौण्डभट्टस्य नास्ति कोप्याग्रहः। स लकाराणां वर्तमानत्वाद्यर्थे द्योतकत्वमपि स्वीकरोति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १८२)। लकारार्थनिरूपणमिति शीर्षकं दत्त्वा प्रकरणस्यारम्भं कृत्वा वर्तमानत्वाद्यर्थश्च लकारस्यास्तीति अतस्तस्य वाचकत्वमपि लिखति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७०)। यदि लकारस्यार्थो न सम्भवति तर्हि *वर्तमाने लट्* (अ. ३/२/१२३) इत्यादिसूत्राणां लकारस्य वर्तमानार्थबोधे शक्तिग्राहकत्वं न सिध्येत्। यदि च लकारमात्रे शक्तिस्तर्हि प्रत्ययानां वाचकत्वविलोपः स्यादत उभयार्थत्वं स्वीकरोति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. ३७)। नागेशस्तु उच्चारितशब्दानामेवार्थप्रत्यायकत्वेन लकारादेशानामर्था इति धिया लादेशार्थनिरूपणं करोति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १३८)। भाष्यकारश्च *उपपदमतिङ्* इति सूत्रभाष्ये तिङर्थः क्रिया एव इति उक्तवान् (पतञ्जलिः, महाभाष्यम्(द्वितीयो भागः), सन् १९९९, पृ. १९२)। भाष्यस्यानेन वचनेन कैयटः काल-साधन-संख्या-पुरुष-क्रिया-उपग्रहभेदेन तिङर्थः षड्विधः, परन्तु साध्यक्रियात्वेन क्रियायाः प्राधान्यं भवति इति लिखति (पतञ्जलिः, महाभाष्यम्(द्वितीयो भागः), सन् १९९९, पृ. १९२)। भाष्यकारश्च *सार्वधातुके यक्*(अ. ३/१/६७) इति सूत्रे तिङभितभावेन कालपुरूषोपग्रहा अभिव्यक्ता भवन्तीति कथयति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९,

पृ. १४२)। तथैव *प्रशंसायां रूपप्* (अ.५/३/६६) सूत्रस्य *क्रियाप्रधानमाख्यातम्* इति भाष्यकारस्य वचनव्याख्याने कैयटः कालसंख्यासाधनोपग्रहाः तिङर्था इति चतुरोऽर्थान् व्याख्याति (पतञ्जलिः, महाभाष्यम्, सन् १९९९, पृ. २४०)।

भर्तृहरिरपि वाक्यपदीयस्य तृतीयकाण्डे साधनक्रियाकालपुरुषसंख्योपग्रहाणां तिङर्थत्वं स्वीकृत्य विस्तारेण व्याख्याति। नागेशकौण्डभट्टभट्टौ च धात्वर्थप्रकरणे तिङर्थविषये कर्तृकर्मणी तिङर्थे इति वेदयितुं प्रमाणत्वेन कारिकामुपन्यस्यतः (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७)। इत्थं मुख्यतः सर्ववैयाकरणमतेन विशेषतः संख्या-कारक-कालविशेष-भावाश्चत्वारोऽर्थाः स्पष्टीभवन्ति।

यत्नस्यापि व्यापारार्थत्वेन तस्य धातुलभ्यत्वात् तस्य तिबर्थत्वं न स्वीकर्तव्यम् (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. ३९)। गच्छति इत्यादौ गमनकर्तुः साक्षाद्बोधस्य सर्वानुभवबोधेन तस्य कर्त्रर्थत्वमेव न्याय्यम् । रथो गच्छति इत्यादौ च कृत्याश्रयत्वं कर्तृत्वम्, इति नैयायिकलक्षणस्याव्याप्तेश्चासम्भवात् यत्नार्थे दोषो भवति। रथो गच्छतीत्यादौ लक्षणाश्रये गौरवम्। कृत्याश्रयत्वं कर्तृत्वमिति लक्षणं दण्डः करोति इत्यादाव्याप्तिदोषग्रस्तम् (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. २४६) ।

लकारस्य कर्तरि कर्मणि च शक्तिः स्वीकर्तव्या। यदि नैयायिकादिमतानुसारेण यत्नाद्यर्थः स्वीक्रियते चेत् शत्रादीनामपि कर्तृकर्मवाचिता न सिध्येत्, स्थान्यादेशयोः समानार्थकत्वनियमात् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १०४)। तथैव लकारस्य कर्तृकर्माद्यवाचित्वे तिबादेरप्यवाचित्वेन तिङ्वाच्यवाचकत्वरूपसामानाधिकरणस्य युष्मद्यस्मदि चाभावेन पुरुषव्यवस्था च न स्यात् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १०४) इति। अतः समस्तदोषपर्यालोचनेन तिङः कर्त्राद्यर्थत्वे एव लाघवम्। यद्यपि कर्तृत्वमनन्तं तथापि *स्वतन्त्रः कर्ता* (अ.१/४/५४) इति सूत्रानुशासनात् स्वातन्त्र्येण विवक्षितत्वमेव कर्तृत्वम्, तच्च सकलकर्तृष्वखण्डोपाधिरूपमेकमेवेति न किमपि गौरवं शक्यतावच्छेदक इति निश्चितम्।

सर्वत्र लत्वस्यैव वाचकत्वं, भवति, पचति इत्यादौ लादेशतिपा यत्नाद्यर्थज्ञानं तु शक्तिभ्रमादेव इति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४८) नैयायिकमतं न समीचीनम्। निःसन्देहज्ञानस्य भ्रमत्वायोगात्। उच्चारितशब्द एवार्थप्रत्यायको नानुच्चारित इति न्यायात् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १३८)।

तिङन्तस्थले पचति इत्यादौ प्रत्ययार्थप्रधानस्यापवादभूतं भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति यास्कवचनमस्ति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १०९)। अत्र एवाख्यातस्थले सर्वत्र भावस्यैव प्राधान्यं बोद्धव्यम्। भावश्च क्रिया, सा च व्यापाररूपा।

प्रथमान्तार्थमुख्यविशेष्यकबोधे पश्य मृगो धावति इत्यत्र भाष्यसिद्धैकवाक्यताया अभावेन दोषो भवति। उत्तरदेशसंयोगानुकूलधावनानुकूल-कृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति बोधश्च भवति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. ११०)। तथा च पश्य मृगो धावति इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्, प्रथमान्तमृगस्य धावनक्रियाविशेषस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. ६५)। यदि शत्रन्तप्रयोग एव इष्यते पश्य मृगो धावति इति न युज्यते तर्हि शतृशानचोरप्रथमासमानाधिकरणे नित्यत्वेन कदापि पश्य मृगो धावति इति भाष्यसिद्धैकवाक्यस्य प्रयोक्तुमशक्यं स्यात् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. ६६)।

शाब्दिकानां मते तु व्यापारमुख्यविशेष्यकशाब्दबोधान्नोक्तदोषः। शाब्दबोधश्चेत्थं मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनम् इत्येकवाक्यतयैव बोधः। पश्य मृगो धावति इत्यस्यैकवाक्यता चाक्षुणा एव। अतो नैयायिकमत इवात्र मृगस्य न कर्मतापत्तिः। यतो हि धावति इत्यस्य कर्मत्वात्, तस्य च तिङ्त्वेनाप्रातिपदिकत्वेन

विभक्तेरुत्पत्त्यभावात्। प्रातिपदिकादेव सुबुत्पत्तिः सम्भवति, तिङन्तान्न सुबुत्पत्तिरतः कर्मत्वेऽपि पश्य मृगो धावति इत्यत्र द्वितीयापत्तिर्न सम्भवतीति।

अत एव तिङर्थो धात्वर्थे विशेषणं भवति। तिङर्थसंख्यायाः कर्तृकर्मणोरन्वयः। तिङर्थकालस्य धात्वर्थव्यापारेऽन्वयः। फलादपि व्यापारस्य प्राधान्याद् इत्थं धात्वर्थव्यापारमुख्यविशेष्यक-शाब्दबोधो भवति। नवीनवैयाकरणाः कर्मवाच्ये फलमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। प्राचीनाश्च फले प्रधानं व्यापार इति वचनेन सर्वत्र व्यापारमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। तिङर्थस्य प्रत्ययार्थत्वेन *प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्* इति नियमेन प्रत्ययप्राधान्यं तु न भवति। *क्रियाप्रधानमाख्यातम्* इति यास्कवचनमस्यापवादः (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. ६३)। अतो तिङर्थस्य विशेषणत्वं स्वीक्रियते वैयाकरणैः।

कालोऽपि तिङर्थः। कालस्य तिङर्थकर्तृकर्मणोरन्वयाभावात् व्यापारेऽन्वयः॥ कालस्य विवेचनं क्रियते-

**कालविवेचनम्**

लकारार्थविवेचनसन्दर्भे कालस्यापि लकारार्थत्वात्तद्विवेचनं सान्दर्भिकमेव। कर्तृकर्मसंख्याकाला लकारार्थाः सन्ति। अतः कालस्यापि लकारार्थान्तर्भूतत्वेन विवेचनमत्यावश्यकम्। महर्षिणा पाणिनिना कालस्य परिभाषा न दत्ता। स्वतो लोकादेव कालस्य ज्ञानसम्भवेन तस्य परिचयप्रदाने गौरवाल्लघ्वर्थमेव व्याकरणशास्त्रस्य प्रणयनात्। अत एव अकालं पाणिनीयव्याकरणमित्युच्यते। तथा च काशिकायां'पाणिन्युपज्ञमकालकं व्याकरणम्(काशिका २/४/२१)इत्युक्तमस्ति। कालस्य भेदविषये सामान्यरूपेण सर्वेषां विदुषां मतैक्यमस्ति। त्रयः कालाः भूतभविष्यद्वर्तमानाः। त्रयः काला इति उपाधिकृतभेदा एव। वस्तुतस्तु काल एक एव। परन्तु व्यवहारे क्रियाभेदेन कालस्य भेद इति ज्ञायते। क्षण-पक्ष-मास-ऋतु-संवत्सरादिव्यवहारस्तु क्रियाया एव भवति। कालश्चैकोऽखण्डश्च। अत एव भाष्यकारश्च *कालाः परिमाणिना* (अ.२/२/५) इति सूत्रव्याख्याने कालस्य तात्त्विकविवेचनसन्दर्भे कालस्यैकत्वमखण्डत्वञ्च परिचाययति। वस्तूनामुपचयोपचययोः कालस्योपलक्षितत्वेन क्षणमासादिव्यवहारो भवति। अयञ्च औपाधिको भेदः (पतञ्जलिः, महाभाष्यम्(द्वितीयो भागः), सन् १९९९, पृ. १६७)। *वर्तमाने लट्*(अ.३/२/१२३) इति सूत्रे वार्तिककारभाष्यकाराभ्यां कालस्य विभागानां चर्चां कृत्वा मुख्यरूपेण भूतभविष्यद्वर्तमानभेदेन त्रैविध्यं प्रतिपादितम्। सन्ति च कालविभागाः। सन्ति खल्वपि कालविभागाः। तिष्ठन्ति पर्वताः, स्थास्यन्ति पर्वताः, तस्थुः पर्वता इति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २६१)।

'कालस्तावद् अद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः' इति वर्णयित्वा कौण्डभट्टः कालस्य विवेचनं कृत्वा तत्र वर्तमानस्यापि योगेन अन्ततो भूतभविष्यद्वर्तमाना इति कालत्रयं स्वीकरोति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १८४)। अन्यथा वर्तमानकालस्य लक्षणे 'भूतभविष्यद्भिन्नत्वं वर्तमानत्वम्' (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७३) इत्येव न निगदति। कालः क्रियारूपः, क्रियाव्यतिरिक्तश्च इति पक्षद्वयं दूषयित्वा क्षणधारारूपः काल इति नागेशेन स्वीकृत इति लघुमञ्जूषायामपि दृश्यते (मिश्रः र. , २०४०, पृ. ४०)। कालस्य प्रमुखं भेदं शीर्षकं विधायाधश्चर्च्यते।

**वर्तमानत्वम्**

लकारार्थस्य कालस्य विवेचने लट्लकारस्य लडादेशस्यार्थो वर्तमानकाल इति विदुषां मतम्। वर्तमानकालोऽपि कालविशेष एव। वर्तमानादिषु विधीयमानानां लकाराणां कालोऽप्यर्थः। नहि विशेषः सामान्यादतिरिच्यत इति

न्यायात्। तत्र वर्तमानत्वञ्च किम् इत्यत्र विद्वद्भिः स्वकीयं मतं प्रस्तुतम्। भाष्यकारश्च *ननौ पृष्टप्रतिवचने*(अ.३/२/१२०) इति सूत्रव्याख्याने एष नाम न्याय्यो वर्तमानः कालो यत्र क्रियाया असमाप्तिर्भवति इत्युक्तवान् (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५८)। *वर्तमाने लट्*(अ. ३/२/१२३) इति सूत्रव्याख्याने वर्तमानकाले आरब्धकार्यस्यासमाप्तिर्भवति इति स वर्तमानकालो भवति भाष्याशयः (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २६०)। तथैव वाक्यपदीयकारो भर्तृहरिश्च क्रियावयवानां प्रतिक्षणं पृथक् विभक्तेष्वपि आकारसंक्रान्त्यैकत्वं यत्र सम्भवति तदवस्था वर्तमानतास्ति इति दार्शनिकशब्दावलीं प्रयुज्य वर्णयति (भर्तृहरिः, सन् १९४२, पृ ९०)। भूतभविष्यद्भिन्नत्वं तथा प्रारब्धासमाप्तिमत्त्वं च वर्तमानत्वमिति कौण्डभट्टस्याशयः (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७३)। नागेशभट्टस्यापि प्रारब्धः परन्तु असमाप्तो यो व्यापारस्तस्योपलक्षितः कालो वर्तमानकाल इत्येतदर्थकमतमस्ति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४१)। अतः कालः क्रियात्मक इति सिद्धान्तानुसारेण प्रारब्धापरिसमाप्तत्वं वर्तमानत्वमेव।

यदि कालः क्रियात्मको नास्ति, क्रियाधिकरणं काल एव इति स्वीक्रियते तर्हि भूतभविष्यद्भिन्नत्वमेव वर्तमानत्वम् इति स्वीकर्तव्यम्, अत्र धातुविशिष्टत्वं वा वर्तमानत्वम्।। अत्र भाष्यकारश्च वदति- 'न्याय्या त्वेषा वर्तमानता। कुतः ? आरम्भानपवर्गात्' (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २६०)। पुनश्च तत्र भोजनादिना व्यवधाने वर्तमानत्वं न स्यादिति आशङ्क्य समाधानेन यथा देवदत्तस्य भोजनं कुर्वतो मध्ये जलपानं, हसनं, जल्पनं च दृश्यते, न च भक्षणमात्रं तथैव अध्ययनकार्यस्यापि मध्ये भोजनस्य व्यवधानेऽपि तद्वत् वर्तमानत्वमेव ऊह्यम् इत्याशयं प्रकटयति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २६०)। वर्तमानस्य भेदविषये भर्तृहरिर्वर्तमानस्य द्विधात्वं कथयति। सामान्यो गौणश्च। गौणो वर्तमानश्चातिदिष्टः (भर्तृहरिः, सन् १९४२, पृ. ३८)।

अतो भाष्यपर्यालोचनेन वैयाकरणग्रन्थावलोकनेन च क्रियारम्भस्य समाप्तिर्नास्ति यत्र, तत्र वर्तमानकाल इति बुध्यते। अध्ययनादिकार्यस्य मध्ये भोजनादिक्रियाया व्यवधानेऽपि अध्ययनस्यासमाप्तिदर्शनेन अधीते इत्यस्य प्रयोगो भवति तत्र च वर्तमानकालः स्वीक्रियते। यथा देवदत्तो भुङ्क्ते इत्यत्र वर्तमानता सिद्धा भवति। अतः प्रारब्धापरिसमाप्तत्वं वर्तमानत्वम् इति लक्षणं भाष्यसम्मतम्।

### भूतत्वम्

सामान्यरूपेण कालत्रितस्य मध्ये भूतकालस्यापि परिचयः क इत्यत्र वैयाकरणानां विदुषां मतमध्येतव्यम्। कालविभागो भूतः। यत्र वर्तमाने क्रियाया निष्पत्तिर्भवति, वर्तमानकाले च यस्याः क्रियाया ध्वंसो भवति तत्र तादृशक्रियावबोधाय भूतत्वं व्यवह्रियते। वर्तमानकालवृत्तिध्वंसप्रतियोगिनी या क्रिया तादृशक्रियोपलक्षितत्वमेव भूतत्वमिति नागेशः परमलघुमञ्जूषायां कथयति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४५)। कौण्डभट्टश्च- 'विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्' इति लक्षयति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. २०३)। अत एव भूतकाले सम्पन्नेऽपि घटे अधुना विद्यमानेऽपि घटोऽभूदिति प्रयोगो भवति। घटस्य ध्वंसो न अपितु घटोत्पत्तिभूतस्य क्रियात्मकस्य कालस्य ध्वंसेन घटस्य विद्यमानेऽपि तादृशः प्रयोगः सुतरां सिध्यति। भाष्यकारश्च वर्तमानकालो भूतभविष्यत्कालयोः प्रतिद्वन्द्वी काल इति दर्शयति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २६०)।

'अयमत्र संग्रहः। कालो द्विविधः-अद्यतनोऽनद्यतनश्च। तत्राद्यस्त्रिविधो भूतवर्तमानभविष्यद्भेदात्। अन्त्यो द्विविधो भूतो भविष्यंश्च'इत्युक्त्वा भूतस्याद्यतनानद्यतनभेदेन द्विविधात्वं कौण्डभट्टः प्रदर्शयति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. २०४)।अत एव उपर्युक्तभेददर्शनेन भूतो द्विविध अद्यतनानद्यतनभेदेन इति ज्ञायते।

वाक्यपदीयकारो भर्तृहरिस्तु भूतसामान्यद्यतनानद्यतनव्यामिश्रातिदिष्टादिभेदेन भूतः पञ्चधेति स्वीकरोति (भर्तृहरिः, सन् १९४२, पृ. ३८)। पञ्चविधो भूतस्त्रिषु लकारेष्वन्तर्भवति। तत्र अनद्यतने भूते लङः प्रयोगो भवति, अनद्यतने भूते परोक्षे च लिट्प्रयोगो भवति। अद्यतने सामान्ये च लुङ्लकारस्य प्रयोगो भवतीति ज्ञेयम्। विस्तरशो वर्णनन्तु लकारविशेषार्थे क्रियते।

**भविष्यत्त्वम्**

भविष्यत्कालस्य निर्वचनाय इदं बोध्यम्, भविष्यति वर्तमानस्य प्रतिद्वन्द्वता स्थास्यति। वर्तमानकाले च भविष्यत्कालस्य प्रागभावस्तिष्ठति। अत एव नागेशोऽपि तदेव वदति मञ्जूषायाम्-'भविष्यत्त्वं च वर्तमानप्रागभावप्रतियोगिक्रियोपलक्षितत्वम्' (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)।

भविष्यतो भेदविषये कौण्डभट्टो द्विविधात्वं प्रतिपादयति। अद्यतनानद्यतनभेदेन (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १८४)। भर्तृहरिस्तु वाक्यपदीये सामान्याद्यतनानद्यतनव्यामिश्रभेदेन भविष्यतो चातुर्विध्यं वर्णयति (भर्तृहरिः, सन् १९४२, पाना / पानाहरु ३८)।

लादेशास्तिङ एव न सन्ति। तत्र लटः स्थाने शतृशानजादेशावपि भवतः। *लटः शतृशानचावप्रथमासमानाधिकरणे* **(**अ.३/२/१२४**)** इत्यनेन आत्मनेपदनिमित्ताद्धातोः शानच्प्रत्ययः, परस्मैपदिनस्तु शतृप्रत्ययः। यथा भवन्, एधमान इत्यादयः। तथैव भविष्यन्, एधिष्यमान इत्यत्र लृटः स्थानेऽपि तद्वदेवादेशौ भवतः। लिटोऽपि क्वसुकानजादेशौ भवतः। अतो लादेशानामर्थाश्च पूर्वोक्ताश्चत्वार एव। वर्तमानभूतभविष्यदर्थाश्च लकारविशेषाणामेव। अत एव मुख्यतश्चत्वारो लकारार्था सन्तीति सिद्ध्यति। अत्र विशेषलकारस्यार्थो विस्तरेण शीर्षकं कृत्वा अधः प्रदर्श्यते-

**लडर्थविचारः**

*वर्तमाने लट्*(**अ.**३/२/१२३) इति सूत्रं निर्मापयता महर्षिणा पाणिनिना लटा वर्तमानत्वं द्योतितम्। तत्र धातोः, प्रत्ययः, परश्च इत्यादिसूत्राणामधिकारस्यानुवर्तनेन धातोरर्थो वर्तमानत्वं, तद्द्योतनाय लट् भवति इत्यर्थलाभाय सूत्रं कृतमिति ज्ञायते। अथवा वाचकपक्षेऽपि लडर्थो वर्तमान इति ज्ञायते।

भट्टोजिदीक्षितोऽपि लट्लकारस्य लडादेशस्य च वर्तमानत्वाद्यर्था भवन्तीति कथयति। तत्र द्योत्ये वाच्ये च लकारस्य विधानं स्वीकरोति। *वर्तमाने लट्* इत्यस्यार्थकथने वर्तमानक्रियावृत्तेर्धातोर्लट् स्यादिति अभिधत्ते (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ४)। तथैव *विधिनिमन्त्रणा०*(अ.३/३/१६१) इतिसूत्रार्थकथने 'एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात्' इति कथयति (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ३८)। अनेन लकारस्य वाचकद्योतकत्वं स्वीकरोतीति ज्ञायते।

नागेशभट्टश्च लादेशतिङामर्थो वर्तमान इति स्वीकरोति। तस्य मते लकाराणामनुच्चरितत्वेनार्थबोधकत्वं न सम्भवति। उच्चारितशब्द एवार्थप्रत्यायको नानुच्चरितः इति न्यायात्। अतो वर्तमाने लट् इत्यादिसूत्रञ्च तदादेशतिङामर्थं स्थानिनि प्रकल्प्य रचितं सूत्रकारेण इति ज्ञेयम् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १३८)। एतदतिरिक्ताश्च 'तत्र संख्याविशेष-कालविशेष-कारकविशेष-भावा लादेशमात्रस्यार्थाः' (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १३८)। अतो लटोऽपि लकारत्वेन चत्वारोऽर्थाः कथिताः। तत्र कालविशेष इत्यत्र वर्तमानकालविशेष इत्यवधेयम्। लः कर्मणि इत्यादिसूत्राच्च कर्तृकर्मभावानां लकारेण बोधो भवतीति ज्ञायते। अतो लडादेशस्य

लट्लकारस्य वा वर्तमानकालः, कर्तरि प्रत्यये कर्ता, भावकर्मप्रत्ययस्थले भावकर्मणी, शबादिसमभिव्याहारे कर्ता, यक्चिण्समभिव्याहारे भावकर्मणी, उभयसमभिव्याहारे संख्या चार्थो भवति। अत एव पचति इत्यादितो यथा कर्तृकर्मणो द्वयोरपि बोधापत्तिः स्यात्, सकृदुच्चरितन्यायेन एकस्यैवार्थबोधश्चेत् यथा कर्तुर्बोधस्तद्वत् कर्मणोऽपि सर्वत्र बोधः स्यादित्यत्र नागेशः कारिकया समाधत्ते-

*फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।*

*व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥ (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १३९)*

फलव्यापारौ धात्वर्थौ। तत्र फले च तङ्यक्चिणादय आश्रयत्वं द्योतयन्ति, अतस्तत्र फलस्य प्राधान्येन लकारेण तदाश्रयस्य कर्मणो बोधो भवति। शप्श्नमादिना तु लकारेण व्यापाराश्रयस्य कर्तुर्बोधो भवति। अतो पचतीत्यादितो कर्तुर्बोधो लकारेण भवति चेत् पच्यते इत्यत्र च लकारेण कर्मणो बोधो भवति। भूयते इत्यादितो च भावस्य बोधो भवति, भावश्च व्यापार एव। भावप्रत्ययादतिरिक्ते लकारे एकत्वद्वित्वबहुत्वानां बोधो भवति। भावप्रत्यये तु भावस्यैवोक्तत्वेन एकत्वस्यैव बोधो भवति। यथा त्वया मया अन्यैश्च भूयते इत्यत्र भवनक्रियाया एव लकारेण बोधो भवति।

इत्थं लडर्था वर्तमानकालः, संख्या, कर्ता, कर्म, भावः इत्यर्थाः कथिताः।

**लिडर्थविचारः**

*परोक्षे लिट्* (अ.३/२/११५) इति सूत्रेण परोक्षार्थे लिट्विधानेन तत्र चानद्यतनस्य भूतस्य चानुवर्तनेन च भूतानद्यतनपरोक्षत्वञ्च लिटोऽर्थः। लिटतिङोऽर्थो वा। शेषं लड्वत् संख्या-कारक-काल-विशेष- भावाश्चार्थाः। कालविशेषे च भूतानद्यतनत्वं परोक्षत्वं च ज्ञेयम्। अत्र नागेशः-'लिट्तिङस्तु भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः' (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४२)इति।

**भूतानद्यतनत्वम्**

अनद्यतने भूते परोक्षे च लिट् भवतीति ज्ञातम्। अत्र अनद्यतनपदार्थः कः ? इति विचिकित्सा। अत्र भाष्यकारवार्तिककारौ *अनद्यतने लङ्* (अ.३/२/१११) इति सूत्रव्याख्यानक्रमे अनद्यतनशब्दे बहुव्रीहिं समर्थयतः, न विद्यतेऽद्यतनो यस्मिन् सः (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २४९)। अद्यतनाद्भिन्नो भूतः अनद्यतनभूतः। अनद्यतनान्तर्भूतोऽद्यतनश्च क इति विषये विदुषां न मतैक्यम्। कैयटहरदत्तन्यासकारादयो मतैक्यं प्रतिपादयन्ति। तेषां मते- सम्पूर्णो दिवसो व्यतीतरात्रेश्चतुर्थः प्रहरः, आगामिन्या रात्रेश्च प्रथमः प्रहरोऽद्यतनस्तद्भिन्नोऽनद्यतनः (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २४९)। तथाभिधो भूतोऽनद्यतनभूतः। कैयटमतमेवानुसरन्ति न्यासकारादयः।

भट्टोजिदीक्षितस्तु *कालोपसर्जने च तुल्यम्* (अ.१/२/५७) इतिसूत्रव्याख्याने अद्यतनञ्च- 'अतीताया रात्रेः पश्चार्धेनागामिन्याश्च पूर्वार्धेन च सहितो दिवसोऽद्यतनः' इत्यभिप्रैति (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २००१)। इदमेवाभिप्रेत्य नागेशोऽपि अद्यतनमित्थं लक्षयति-'भूतानद्यतत्वञ्च अद्यतनाष्टप्रहरीव्यतिरिक्तत्वे सति भूतत्वम्' (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४३)। अर्थादष्टप्रहरात्मकः कालोऽद्यतनशब्देन गृह्यते तद्भिन्नो भूतश्च भूतानद्यतन इति। अनेन दीक्षितमतेनैक्यं बुध्यते।

**परोक्षत्वम्**

परादक्ष्णः परोक्षम् इति व्युत्पत्तिः। अक्षिशब्दस्यार्थो नेत्रम्। अश्-धातोरौणादिकः सिप्रत्ययः। परोक्षे लिट् इति सूत्रव्याख्याने भाष्यकारः, अक्ष्यादीन्द्रियात्परं वस्तु परोक्षशब्देन ज्ञायत इति व्याख्याति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५१)। वस्तुतस्तु अक्षिशब्देन केवलं नेत्रगोचरस्यैव वस्तु न ग्राह्यमपितु अक्षिशब्दोऽत्र इन्द्रियमात्रवाचकः। अत इन्द्रियमात्राग्राह्यव्यापारो ग्रहीतव्यः। कैयटश्च प्रदीपे-'वृत्तिविषये चाक्षिशब्दः सर्वेन्द्रियवाची न तु चक्षुर्मात्रपर्यायः। अन्यथेन्द्रियाऽन्तरविज्ञातं वस्तु परोक्षशब्दवाच्यं स्यात्' (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५१)। नागेशस्तत्रैवोद्योते परोक्षलक्षणं प्रतिपादयन्-'इन्द्रियाजन्यं ज्ञानं परोक्षम्। अत एव परोक्षं ज्ञानमुपपद्यते' (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५१) इत्यभिधत्ते। अक्ष्णः परम् इति विग्रहे पराक्षमित्येव स्यात् कथं परोक्षमिति विषये भाष्ये परस्य परोभावः, वा अक्षि इत्यस्य उत्वं, अथवा शब्दस्यैव निपातनाच्च सिद्धमिति कथितम् (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५१)।

क्रियाया अपि अतीन्द्रियत्वेन सिद्धान्ते साधनानां परोक्षत्वमेव न्याय्यमिति स्थिरीकरोति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २५२)। नागेशोऽपि परोक्षत्वस्य कारके विशेषणं मनुते अतः परोक्षस्य लक्षणं साक्षात्कृतविषयस्य ज्ञानाविषयत्वं परोक्षत्वमित्यकारकं प्रतिपादयति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४३)। वैयाकरणभूषणसारे च कौण्डभट्टोऽपि कर्तृकर्मणोः साक्षात्कारस्यासम्भवविषयताशालिज्ञानविषयत्वमिति परोक्षशब्दार्थं स्वीकरोति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १८४)।

अनुप्रयुक्तानां कृभ्वसां क्रियासामान्यमर्थोऽस्ति। एधाञ्चक्रे, गोपायाञ्चकार इत्यादिषु लिटि *कास्प्रत्ययादाममन्त्रे लिटि* (अ.३/१/३५) इत्यादिभिः सूत्रैराम्प्रत्ययो भवति, पश्चाच्च कृभ्वसां धातूनां प्रयोगो भवति। *कृञ्चानुप्रयुज्यते लिटि* (अ.३/१/४०) इति सूत्रस्थकृञ्ग्रहणेन कृ-भू-असां धातूनां ग्रहणं कर्तव्यम्। कृञ्चात्र प्रत्याहारः (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. १२०)। ते च धातवः प्रकृतिभूतधातोरेवार्थं वहन्ति ? वा अन्यदर्थं वहन्ति इत्यत्र भाष्यालोकनेन क्रियासामान्यमर्थं वहन्ति इति ज्ञायते। अतः सामान्यविशेषयोरभेदः इति न्यायेन प्रकृतिभूतधात्वर्थस्यैव वाचका भवन्तीति विज्ञायते। एतदभिप्रेत्य नागेशः परमलघुमञ्जूषायां क्रियासामान्यार्थवाचित्वेन निर्दिशति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४३)। एधाञ्चक्रे चैत्र इत्यस्य शाब्दबोधे एकत्वसंख्यायुक्तपरोक्षताविशिष्टचैत्रकर्तृक-भूतानद्यतनकालाधिकरणिका वृद्ध्यभिन्ना क्रिया इति बोधो भवति।

अत एव भूतानद्यतनत्वं परोक्षत्वं च लिडर्थः। संख्याकर्तृकर्माणि च लड्वदर्था बोध्याः।

**लुडर्थविचारः**

*अनद्यतने लुट्* (अ.३/३/१५) इति पाणिनिसूत्रानुशासनेन अनद्यतनत्वं भविष्यत्त्वञ्च लुडर्थः। वैयाकरणभूषणसारे च कौण्डभट्टः श्वो भाविन्यर्थे लुट् स्यादिति कारिकया प्रस्तौस्ति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १७०)। लुडादेशं वाचकं स्वीकृत्य नागेशेनापि-'लुडादेशस्य च भविष्यदनद्यतनार्थोऽधिकः। शेषं लड्वत्' इत्युक्तम् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। तत्रानद्यतनत्वञ्च लिडर्थे प्रतिपादितम्। भविष्यत्त्वञ्च वर्तमानप्रागभावप्रतियोगित्वम्। वर्तमानकाले यस्याः क्रियायाः प्रागभावस्तस्याः प्रतियोगिनी या क्रिया तादृश्याः क्रियाया अवबोधाय प्रयुज्यमानं वाक्यं भविष्यत्कालिकवाक्यम्। नागेशश्च-'भविष्यत्त्वं च वर्तमानप्रागभावप्रतियोगिक्रियोपलक्षितत्वम्' इति स्वीकरोति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। यथा घटः श्वो भविता इत्यादौ घटस्य सत्तारूपा क्रिया श्वस्तनदिवसे सम्पद्यते, अतोऽद्य तस्याः क्रियायाः प्रागभावो वर्तते, अतः

प्रागभावस्य प्रतियोगिनी क्रिया सत्ता अस्ति, यस्याभावः स प्रतियोगी इति नियमात्। अतः सत्ताक्रियाया उपलक्षितकालः श्वः भविष्यत्काल इति ज्ञायते।

भाष्ये चानुशोचने च लृड्विषये लुटः प्रयोगो दृश्यते। यथा इयं नु कदा गन्ता, यैवं पादौ निदधाति। यद्येवमियं बाला पादौ निदधाति, तर्हि कदा गमिष्यतीत्यर्थः (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. २९५)। अत्र भाष्यवार्तिकस्थस्य श्वस्तनी इत्यस्य लुटः संज्ञा इति कैयटो व्याख्याति। अतो लृट्विषयेपि लुट्लकारो भवतीति ज्ञायते। श्वो गृहं गन्ता इत्यादीन्युदाहरणानि।

**लृडर्थविचारः**

*लृट् शेषे च* (अ.३/३/१३ इति पाणिनीयसूत्रानुसारेण सामान्यभविष्यत्काल एव लृड्विधानेन सामान्यभविष्यदेव लृडर्थः। भविष्यति गम्यादय इति सूत्रात् अनद्यतने लुट् इति पर्यन्तं विभिन्नार्थेषु भविष्यदर्थे वर्तमानकालिकप्रत्ययस्य लटोऽपि प्रयोगो भवति। यदा कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता इत्यादि। एतेषामर्थास्तु एक एव। एवञ्च लोडर्थलक्षणेऽपि भविष्यदर्थे लट्प्रत्ययस्य विकल्पेन *लोडर्थलक्षणे च* (अ.३/३/८) विधानं कृतम्। *तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्* (अ.३/३/१०) इत्यनेन क्रियार्थकक्रियाया बोधाय भविष्यत्कालिकप्रयोगाय तुमुन्ण्वुल्प्रत्यययोर्विधानं कृतमस्ति। कौण्डभट्टेन चाभिहितम्-'भविष्यत्सामान्य इत्यर्थः। लृट् शेषे च इति सूत्रात्' (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९१) । नागेशेनाप्यस्मिन्नेवार्थे स्वकीयां सम्मतिं प्रदर्श्य उक्तम्-'लृट्तिङस्तु भविष्यत्सामान्यमेवार्थ इति'। भविष्यत्त्वञ्च वर्तमानप्रागभावप्रतियोग्युत्पत्तिमत्त्वम् इति नैयायिकमतप्रदर्शने प्रतिपादितं परमलघुमञ्जूषायाम् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १५५)। उत्पत्तौ च देशविशेषः कालविशेषश्चाधिकरणतयान्वेति। यथा गृहे घटो भविता, अद्य घटो भविष्यति इत्यादौ धातुनोत्पत्तिर्ज्ञायते। प्रत्ययेन च वर्तमानप्रागभावप्रतियोगित्वमाश्रयत्वञ्च ज्ञायते। लृट्तिङ एवार्थवत्त्वं नागेशो मनुते।

**लेडर्थविचारः**

*लिङर्थे लेट्* (अ.३/४/७) इति पाणिन्यनुशासनात् छन्दोमात्रगोचरस्य लेटोऽर्थोऽपि लिङर्थतुल्य एव। यतो हि यथा लिङर्था विध्यादयो भवन्ति, विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनादयस्तथैव लेडर्था अपि । अतो लकारभेदेऽप्यर्थसाम्यं दृश्यते। लेटो लोटो लिङश्चार्थश्च समान एव इति ज्ञापयितुं कौण्डभट्टोऽभिधत्ते-'एतयोऽर्थो लिङर्थ एव, त्रयाणां समानार्थत्वात्' इति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)। अस्य प्रयोगश्च छन्दस्येव। न लौकिके। नागेशेन लटो लेटश्च प्रक्रियायां समानत्वं प्रतिपाद्य अट्-आट्-सिबाद्यागमभेदं प्रदर्श्य लेडादेशतिङामर्थः पाणिनिसूत्रानुसारेण विध्याद्यर्थत्वं शेषं लट्वत्त्वञ्च प्रतिपादितम् (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। तथा च यथा लटि भवति, तथैव लेटि छन्दसि भवाति। अत्र आडागमाधिको विध्याद्यर्थश्च लडपेक्षया। भवाति इत्यादौ च यद्यपि आडागमाधिको दृश्यते परन्तु अन्योऽपि भेदो द्रष्टुं शक्यते। यथा-

लेटोऽडाटौ, आत ऐ, वैतोऽन्यत्र, इतश्चलोपः परस्मैपदेषु, स उत्तमस्य(अ.३/४/९४-३/४/९८)

अत एव अहमेव पशूनामीशै इत्यादौ च लोड्वदपि दृश्यते।

वरदराजाचार्यस्तु- 'एषु पञ्चमो लकारश्छन्दोमात्रगोचरः' इति लेटो विषयेऽभिधत्ते (वरदराजाचार्यः, २०७५, पृ. ७७)।

**लोडर्थविचारः**

*आशिषि लिङ्लोटौ*(अ.३/३/१७३), *लोट् च* (अ.३/३/१६२) इत्यादिसूत्रनिर्देशनेन आशीर्वादार्थो विध्याद्यर्थश्च लोडर्थ इति ज्ञायते। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनाद्यर्था लोडर्थाः। अत्र नागेशः- 'लोट्तिङस्तु विध्यादिरर्थः। तत्राधीष्टं सत्कारपूर्वको व्यापारः, आगच्छतु भवान् जलं गृह्णातु इत्यादौ, संप्रश्नोऽनुमतिः, गच्छति चेत् भवान् गच्छत्वित्यादौ' कथयति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। नागेशोऽधीष्टसंप्रश्नयोः विशेषोल्लेखं करोति। सत्कारपूर्वकव्यापारस्याधीष्टशब्देन व्यवहारो भवति। संप्रश्नश्चानुमतिरिति नागेशमतम्। महाभाष्ये च विध्यर्थकथने उक्तञ्च- विधिर्नाम प्रेषणम्। अधीष्टं नाम सत्कारपूर्विका व्यापारणा (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. ३२७)। विध्याद्यर्थाश्च क्रमशः प्रदर्श्यन्ते-

'विधिः- प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणं नियोगकरणमावश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः' (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ३८)। संप्रश्नः सम्प्रधारणमर्थात् द्वयोः क्रिययोर्मध्ये एकस्यां क्रियायामिष्टसाधनतानिर्धारणम्। प्रार्थना च प्रार्थयित्वा कथनम्।

आशिष्यर्थेऽपि लोटः प्रयोगो भवति। यथा चिरं जीवतु भवान्। इच्छार्थकधातोर्योगेऽपि लिङ्लोटौ भवतः। पाणिनीयसूत्रञ्च- *इच्छार्थेषु लिङ्लोटौ*(अ.३/३/१५७)। यथा इच्छामि भुञ्जीत भुङ्क्तां वा भवान् (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ६६४)।

**लङर्थविचारः**

*अनद्यते लङ्* (अ.३/२/१११) इति पाणिनिसूत्रनिर्देशनेन अनद्यतनभूतो लङर्थः। अनद्यतनत्वञ्च पूर्वमेव लिडर्थकथने उक्तमेव। नागेशमतानुसारेण लङादेशभूततिङर्थोऽनद्यतनाधिकः, शेषं लड्वदेव, संख्याकारकभावाश्चार्था भवन्ति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। यथा अस्य पुत्रोऽभवत् इति। लङाद्यर्थनिरूपणे कौण्डभट्ट इमां कारिकां प्रदर्शयति-

*ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।*
*सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥ (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)*

इत्थं ह्यो भूत अर्थाद् अनद्यतनभूतो लङर्थः। अनद्यतनभूतविषयकक्रियाबोधाय प्रयोक्त्रा साक्षात्कारविषयस्योपादाने लङ्लकारो भवतीति ज्ञायते। प्रत्यक्षाद्ययोग्ये सामान्ये च लङ् न भवति। अतः शेषं संख्याकर्तृकर्मभावाश्च लङर्था लड्वत् सिध्यन्ति।

**विधिर्लिङर्थः**

*विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्* (अ.३/३/१६१) इति पाणिनिसूत्रनिर्देशनेन विध्याद्यर्थे लिङ्विधानं दृष्टम्। अतः विध्यादिरेव लिङर्थः। लोडर्थनिरूपणे विध्यादीनां परिचयः प्रदत्तः। सूत्रकारेण लिङर्थप्रदर्शने विध्यादीनां चतुर्णां पृथक्पठनञ्च प्रपञ्चार्थमेव कृतम्। वस्तुतस्तु प्रवर्तनायामेव चतुर्णामन्तर्भावेन प्रवर्तनासंप्रश्नप्रार्थनेषु लिङ् इत्येव वाच्यम्, लाघवात् इति नागेशाशयः (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)। तत्र हरिकारिका च नागेशः प्रमाणत्वेनोपन्यस्यति-

*अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।*

*तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥ (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४४)*

एतेन विधिनिमन्त्राणादिशब्दोच्चारणापेक्षया प्रवर्तनाया वाच्यत्वं स्वीकृत्य चतुर्णां शब्दानां स्थाने प्रवर्तनाशब्दं स्थापयित्वा प्रवर्तनायां लिङ् इति विधानेऽप्यदोष इति सिध्यति। तर्हि सूत्रकारकथनमयुक्तं स्यात् ? इति प्रश्ने च यद्यपि चतुर्णां प्रवर्तनास्वन्तर्भावस्तथापि विस्तारेण मन्दबुद्धीनामस्मदादीनां कृते तु तथैवोच्चारणस्यावश्यकत्वेन तदुचितमेव। अथवा प्रपञ्चार्थञ्च तत्कर्तुमुचितम्। किन्तु शक्तिस्वीकारे च विध्यादिषु शक्तिकल्पनापेक्षया प्रवर्तनासु शक्तिकल्पनं लाघवम् अतः प्रवर्तना लिङर्थ इति सिध्यति। नागेशमते तु लिङादेशार्थः प्रवर्तना। कौण्डभट्टेनापि प्रवर्तनात्वं स्वीकृत्य चतुर्णामन्तर्भावः प्रदर्शितः। तथैव अन्या अपि कारिका प्रदर्शिता-

*न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।*

*विध्यादीनामुपादानं चतुर्णामादितः कृतम्॥ (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९६)*

इयं कारिका च पाणिनेः सूत्रस्य सार्थक्याय आगतास्ति। मन्दबुद्धीनां कृते तु पूर्वमेव प्रवर्तनात्वेन ज्ञानं कर्तुमशक्यत्वेन विध्यादीनामुपादानं कर्तुमावश्यकमेव इति प्रतिभाति।

**प्रवर्तनात्वम्**

प्रवर्तनात्वञ्च किम् ? इति विषये भाष्यकारस्य विधिः-नियोगः इति वचनस्य व्याख्याने कैयटः- नियोगः प्रवर्तना, प्रवर्तकनिष्ठप्रवृत्यनुकूलो व्यापारः इति कथयति (पतञ्जलिः, महाभाष्यम्(तृतीयो भागः), सन् १९९९, पृ. ३२७), तद्वचनमेव व्यापकीकुर्वन् नागेशः- 'प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्यैवेति तदेव लिङर्थः'इत्यभिधत्ते (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४५)। प्रवर्तनाया लिङादेशार्थं स्वीकुर्वता नागेशेनाप्यत्र लिङर्थ इति कथयित्वा लकारेऽपि शक्तिस्वीकारः कृत इति दृश्यते, प्राधान्येन आदेशे शक्तिस्वीकृतः स्यात्किन्तु स्थानिन्यपि शक्तिस्वीकृत इत्यत्र दृश्यते। अथवा पूर्ववर्ति-आचार्यस्य कौण्डभट्टस्य प्रभावेण तल्लिखितं भवेदिति अनुमन्ये। कौण्डभट्टेनापि तादृशमेव मतं प्रदर्शितं किन्तु लिङर्थ इति स्थाने विध्यर्थ इति कथितम् (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९७)। वैयाकरणौ द्वावेव इष्टसाधनत्वस्य लिङर्थत्वं स्वीकुर्वतः। यस्मिन् कस्मिन्नपि कार्ये प्रवृत्तिस्तु कृतिसाध्यत्वज्ञानेन, इष्टसाधनत्वेन च भवति, परन्तु कृतिसाध्यत्वस्य च लोकेनानुमानेन वा ज्ञातुं सम्भवेऽपि अपूर्वत्वेन इष्टसाधनत्वमेव लिङर्थः स्वीकर्तव्य इति नागेशकौण्डभट्टमतम्। अत एव नागेशः कृतिसाध्यत्वं निराकुर्वन् अभिधत्ते-'न तु कृतिसाध्यत्वं, तस्य यागादौ लोकत एव लाभादित्यन्यलभ्यत्वात्' (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४५) । तथैव कौण्डभट्टश्च नैयायिकस्वीकृत-बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वं निराकुर्वन् वैयाकरणभूषणसारे वदति-'बलवदनिष्टाननुबन्धित्वं च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्' (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९८)। अत्र अन्यथासिद्धत्वं प्रतिपादितमस्ति। आस्तिककामुकस्य नरकगमनज्ञानदशायामपि तत्र द्वेषाभावेनोत्कटकामेच्छया परस्त्रीगमनव्यापारो दृश्यते लोके। अतो बलवदनिष्टाननुबन्धित्वज्ञानं प्रवृत्तौ न हेतुरिति निष्कर्षः।

अन्तत इष्टसाधनत्वमेव विध्यर्थ इति वैयाकरणमतम्। अत्र मीमांसकाचार्यस्य मण्डनमिश्रस्य मतेन सह तुल्यतां दर्शयन् कौण्डभट्टः कारिकया इष्टसाधनत्वस्य कार्यप्रवृत्तौ कारणत्वं स्वीकरोति। उक्तञ्च-

*पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।*

*प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम्॥ (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. २०१)*

कारिकायां प्रवर्तनायाः परिचयदर्शने प्रवृत्तिहेतुर्धर्मः प्रवर्तना इत्थंप्रकारेण दर्शनेन तथा च नागेशेनापि प्रवर्तनाया इष्टसाधनत्वं स्वीकृत्य तज्ज्ञानमेव कार्यस्य प्रवृत्तौ कारणमित्युक्त्वा इष्टसाधनत्वस्यैव विध्यर्थत्वं लिङर्थत्वं वा ग्रहीतुं शक्यते। अतो लिङर्थाः प्रवर्तनासंप्रश्नप्रार्थनादयः सन्ति। शेषं कर्तृकर्मसंख्याश्च लड्वद् भवन्ति।

## आशीर्लिङर्थविचारः

*आशिषि लिङ्लोटौ*(अ.३/३/१७३) इति सूत्रानुसारेण आशीर्वादार्थे लिङ्लकारो भवति। अत एव लिङर्थ आशीर्वादः। अत्र नागेशः- 'लिङो विधिराशीश्चार्थः। यजेतेत्यादौ विधिः, आशीस्तु भूयादित्यादौ सा च शुभाशंसनं तदिच्छेति यावत्' इत्यभिधत्ते (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १५७)। अस्योदाहरणन्तु चिरं जीव्याद् भवान्। *इच्छार्थेषु लिङ्लोटौ*(अ.३/३/१५७) इति सूत्रानुसारेण च इच्छा च लिङर्थ इति बुध्यते। कौण्डभट्टेन च अस्य लकारस्य विषये किञ्चिदपि नोक्तम्। लिङ्सामान्येनास्यापि ग्रहणं कृत्वा हेतुहेतुमद्भावाद्यर्थाश्च प्रदर्शिताः। यथा हेतुहेतुमतोर्लिङ् इत्यनेन हेतुहेतुमति लिङ् भवति। तत्र प्रदर्शितमुदाहरणञ्च- यो ब्राह्मणायावगुरेत्, तं शतेन यातयेत् इति यथा (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. २०३)। अत्र ब्राह्मणावमानस्य हेतुत्वेन हेतुमति यातनं प्रदर्शितमस्ति।

अत आशीर्लिङोऽर्थ आशीः, इच्छा, हेतुहेतुमद्भावः, कर्तृकर्मसंख्याभावाश्च सन्तीति ज्ञायते।

## लुङर्थविचारः

*लुङ्*(अ.३/२/११०) इति पाणिनिसूत्रनिर्देशनेन सामान्यभूते लुङ्लकारस्य विधानं महर्षिणा पाणिनिना कृतम्। परोक्षभूतानद्यतनभूतातिरिक्तेऽस्य प्रयोगो भवति। नागेशश्च लुङर्थस्य भूतमस्वीकृत्य तदादेशार्थं स्वीकरोति (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १४५)। कौण्डभट्टश्च लुङर्थं निरूपयन् भूतमात्रे लुङ् भवतीति व्याख्याति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)। भूतसामान्ये लुङ् भवति, यतो हि तत्र भूते इति सूत्रमधिकृतं भवेत्। अत्र भूतत्वञ्च विद्यमानध्वंसप्रतियोगित्वमेव। वर्तमानकालिकक्रियाया ध्वंसे सति तत्प्रतियोगिनी तादृशी या क्रिया, तस्या आधारः कालो भूतकालो वर्तते। अत एव घटस्य उत्पत्तौ उत्पत्तिसमये वर्तमानत्वेऽपि तदुत्पत्तिसमयात् पश्चात् पूर्वोक्तोत्पत्तिजननाय घटोऽभूदिति वाक्यं प्रयोक्तुं शक्यते। अस्य शाब्दबोधश्च विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयकोत्पत्त्याद्यनुकूलो व्यापार इति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)।

भट्टोजिदीक्षितस्तु लुङ्सूत्रस्यार्थप्रदर्शने 'भूतार्थवृत्तेर्धातोर्लुङ् स्यात्' इति कथयति (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ४७)। अस्योदाहरणञ्च रामो गृहमगमत् इत्यादि सम्भवति।

अनेन लुङो वा लुङादेशस्यार्थश्च सामान्यभूतमिति ज्ञायते। शेषं लड्वत्संख्याकर्तृकर्मभावाश्चार्था ज्ञातव्याः।

## लृङर्थविचारः

*लिङ्निमित्ते लृङ् क्रियातिपत्तौ*(अ.३/३/१३९) इति पाणिनिसूत्रनिर्देशनेन लिङर्थनिमित्तहेतुहेतुमद्भावेऽथवा कार्यकारणभावे वा क्रियातिपत्तौ च लृङ् भवति। नागेशमतानुसारेण च पूर्वोक्तहेतुहेतुमद्भावादयोऽर्थाश्च लृङादेशस्य तिङो भवति। लृङादेशतिङा भूतभविष्यतोर्थो गम्यमानो भवति। नागेशेन एतादृशप्रतीतेश्चापादनसंज्ञा कृता (नागेशः, परमलघुमञ्जूषा, २०१७, पृ. १६३)। महाभाष्यवाक्यपदीयादिग्रन्थे चैतादृशापादना संज्ञा नोपलभ्यते। सम्भवतो न्यायादिशास्त्रप्रभावेन तत्संज्ञा कृता स्यादित्यनुमीयते। अन्यथा महाभाष्यादिग्रन्थादृष्टापादनाशब्दस्य प्रयोगः कथं स्यात्। भूतकालभविष्यत्कालयोर्दृष्ट्या नागेशेन पृथक् पृथगुदाहरणं प्रदत्तमस्ति। भूते- एधश्चेदलप्स्यत ओदनमपक्ष्यत्।

अस्मिन् वाक्ये द्वयोः क्रिययोर्मेलनमेवं पचनञ्च भूतकालेन सम्बन्धितमस्ति। तथैव एकक्रियाया असिद्ध्या अपरक्रियाया अतिपत्तिरत्र भवति। भविष्यति- सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यत्। अत्र भविष्यत्कालिकवृष्ट्यभावेन भविष्यत्कालिकसुभिक्षाभावस्यापादनायाः प्रतीतिर्दृश्यते। अर्थात् कारणाभावेन कार्यस्याप्यसिद्धिः तर्किता वर्तते।

कौण्डभट्टो भूते भाविनि क्रियातिपत्तौ लृङ्लकारविधानं स्वीकृत्य ङिल्लकाराणामर्थनिरूपणाय कारिकां प्रदर्शयति-

*ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।*

*सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥ (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)*

एतेन भूतकाले भविष्यति च क्रियातिपत्तौ हेतुहेतुमद्भावे लृङ्विधानमभिमतमस्ति। उदाहरणप्रदर्शने च कौण्डभट्टो नागेशमताद् पृथग् एकमुदाहरणं प्रस्तौति। तत्र भविष्यति तु समानमेव। यथा- सुवृष्टिश्चेदभविष्यत् सुभिक्षमभिष्यत्। भूते च पृथगेवोदाहरणं प्रदत्तमस्ति (कौण्डभट्टः, वैयाकरणभूषणसारः, २०२९, पृ. १९३)। तच्च- वह्निश्चेत्प्राज्वलिष्यद् ओदनमपक्ष्यत् इति। अत्र सुवृष्ट्यभावेन सुभिक्षाभावस्य प्रदर्शनं तथैव वह्निज्वलनाभावेन ओदनपचनाभावस्यापादना दर्शिता वर्तते। चान्तिमे च शाब्दबोधे वह्न्यभिन्नाश्रयक-प्रज्वलनानुकुलव्यापाराभावप्रयुक्तौदनाभिन्नाश्रयकविक्लित्यनुकूलव्यापारभाव इति बोधो भवति। एकस्याभावेनापरस्याप्यभावो ज्ञाप्यते।

भट्टोजिदीक्षितस्तु वृत्तौ- 'हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्' इत्याख्याति (भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, २०११, पृ. ५१)। अत एव भूते भविष्यति च हेतुहेतुमद्भावेन क्रियातिपत्तिः, कर्तृकर्मसंख्याभावाः लृङर्था इति सिध्यन्ति।

## निष्कर्षः

लकारार्थसम्बन्धे यत्नसंख्याकालास्तिङर्था इति नैयायिकानां मतम्। तथैव मीमांसकानां च व्यापारसंख्याकालाश्च लकारार्था भवन्ति। परन्तु वैयाकरणरीत्या लः कर्मणि० फलव्यापारयोर्धातु० इत्यादिकारिकया च नैयायिकमीमांसकमतं दूषितम्। निर्दुष्टत्वेन वैयाकरणमतमेव न्याय्यम्। तथैव प्रथमान्तार्थमुख्यशाब्दबोधे तिङर्थमुख्यशाब्दबोधे च पश्य मृगो धावति इत्यादिभाष्यसिद्धवाक्येन दोषदर्शनात् वैयाकरणस्वीकृतव्यापारमुख्यविशेष्यकशाब्दबोध एव साधुर्भवतीति स्पष्टम्।

महर्षिः पाणिनिर्लकारस्य शक्तिं कर्तृकर्मभावेषु स्वीकरोति। लः कर्मणि० इतिसूत्रप्रणयेन तत्र कर्तरि कृत् इत्यस्मात् कर्तरिपदस्यानुवर्तनेन लकारस्यार्थः कर्ता, कर्म, भावश्च सिध्यति। तथैव लड्विधाने वर्तमाने लट् इति सूत्रप्रणयेन च लड्लकारस्य वर्तमानत्वे शक्तिरित्यपि बोधयति। कालविशेष एव वर्तमानः। अतः कालोऽपि लकारार्थ इति निश्चप्रचम्। एवमेव नागेशकौण्डभट्टौ च लकारादेशस्य लकारस्यार्थाश्च कर्तृकर्मसंख्याभावा इति स्पष्टरूपेणोल्लिखतः। नागेशादिना विदुषा उच्चारितस्यैवार्थप्रत्यायकत्वं मत्वा लकारादेशे शक्तिः स्वीकृता चेत्कौण्डभट्टो लकारस्यार्थं स्वीकरोति इत्यनयोर्भेदः। कौण्डभट्टस्य कृते तु आदेशेऽपि शक्तिकल्पना सम्मता अस्ति। अन्यथा वर्तमाने लट् इत्यादिविधायकसूत्रस्य वैयर्थ्यापत्तिः स्यात्। महाभाष्यकारश्च प्राधान्येन तिङा क्रियाया बोधो भवति इत्युक्त्वा व्यापारस्य वाचकस्तिङ् इति स्वीकृतम्। तथैव सार्वधातुके यक् इति सूत्रे च तिङभिहितभावेन कालपुरुषोपग्रहाणामभिव्यक्तिर्भवति इत्यादि भाष्यवचनेन कालश्च तिङर्थ इति सिध्यति। कैयटेन च कालसंख्यासाधनोपग्रहास्तिङर्था स्वीकृताः। तथैव भर्तृहरिणापि कालसमुद्देशे साधनक्रियाकालपुरुषसंख्योपग्रहाणां

वर्णनेन प्राधान्यतस्तत्तिङर्थत्वेन स्वीकृतमिति ज्ञायते। अतो निष्कर्षेण कर्तृकर्मसंख्याकालविशेषभावास्तिङर्था वा लकारार्था इति स्वीकर्तव्याः।

अत्र लकाराणां येऽर्था उक्ता ते लकारादेशानामपि अर्था ज्ञेयाः। स्थान्यर्थाभिधानस्यैवादेशता इति न्यायात्। उभयोर्वाचकत्वे वैयाकरणसिद्धान्ताविरोधत्वात्। अत नैयायिकमीमांसकमतेभ्यो लाघवं शास्त्राविरुद्धञ्च वैयाकरणमतमस्तीति विज्ञायते। एतेन वैयाकरणमतस्यैवोत्कर्षता च सिद्ध्यति।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची

कौण्डभट्टः. (२०२९). *वैयाकरणभूषणसारः*. (प्रभाकरः मिश्रः, सं.) वाराणसी: श्रीरामानुजसंस्कृतमहाविद्यालयः.

नागेशः. (२०१७). *परमलघुमञ्जूषा*. (कालिकाप्रसादः शुक्लः, सं.) बडौँडा: महाराजसयाजिरावविश्वविद्यालयः.

पतञ्जलिः. (सन् १९९९). *महाभाष्यम्* (द्वितीयं संस्करण सम्पाद., भा. पञ्चमो भागः). (गुरुप्रसादः शास्त्री, सम्पादक) दिल्ली: प्रतिभा प्रकाशन.

पतञ्जलिः. (सन् १९९९). *महाभाष्यम्*(तृतीयो भागः) (द्वितीय संस्करण सं.). (गुरुप्रसादः शास्त्री, सं.) दिल्ली: प्रतिभाप्रकाशन.

पतञ्जलिः. (सन् १९९९). *महाभाष्यम्*(द्वितीयो भागः) (द्वितीयसंस्करण सं.). (गुरुप्रसादः शास्त्री, सं.) दिल्ली: प्रतिभाप्रकाशन.

भट्टोजिदीक्षितः. (२००१). *वैयाकरणसिद्धान्तकौमुदी* (भा. द्वितीयो भागः). (गिरिधरशर्मा चतुर्वेदः, सम्पादक) दिल्ली: मोतीलाल बनारसीदास.

भट्टोजिदीक्षितः. (२०११). *वैयाकरणसिद्धान्तकौमुदी* (संस्क. तृतीयो भागः). (गिरिधरशर्मा चतुर्वेदः, सं.) दिल्ली: मोतीलाल बनारसीदास.

भर्तृहरिः. (सन् १९४२). *वाक्यपदीयम्*. (पेरिसर्वेश्वरः शर्मा, अनुवादक) वाराणसी: मोतीलाल बनारसीदास.

मिश्रः राममनोहरः. (२०४०). *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा*. वाराणसी : सम्पूर्णानन्दविश्वविद्यालयः.

वरदराजाचार्यः. (२०७५). *लघुसिद्धान्तकोमुदी* (त्रयस्त्रिंशत्प्रकाशनम् सम्पाद.). गोरखपुर : गीताप्रेस गौरखपुर.